# षडङ्गस्वरूपम्

अमितकुमारः साउ, शोधार्थी,
रामकृष्णमिशन्विवेकानन्दशैक्षणिकशोधसंस्थानम्
वेलुडमठः, हावडा

**शोधसारः**

अङ्ग्यते विषयो बुद्ध्यते अमीभिः इति अङ्गम्, वेदस्याङ्गानिवेदाङ्गानिइतिव्युत्पत्यावेदाङ्गशब्दःनिष्पद्यते।वेदाङ्गानिवेदाभिन्नानि।सम्पूर्णोपिवेदःकेनचित्पुरुषेणउपमीयते।तस्यअङ्गसंघातयुतपुरुषस्यसन्तिनैकानिअङ्गानि,एवमेवषडभिरङ्गैरुपेतःअयंवेदपुरुषः।यथाअङ्गानिविविधकार्यैःपुरुषमुपकुर्वन्तिएवम्वेदाङ्गानिवेदार्थावगमनादौसहयकानिभवन्ति।वेदस्ययथामाहात्म्यंतथावेदाङ्गानामपि।तानिचषड्वेदाङ्गानिशिक्षा-कल्प-व्याकरण-निरुक्त-छन्द-ज्योतिषश्चेति। अङ्गं विना यथा अङ्गिनः अस्तित्वं न भवति। तथैव विना अङ्गानाम् अध्ययनम् अङ्गिनः वेदस्य ज्ञानम् तस्मात् अपूर्वप्राप्तिश्च नैव सेत्स्यति। यथा नित्यव्यवहारे अङ्गानां प्रयोगः तथैव नित्यवेदाभ्यासे अङ्गानां उपयोगः वर्तते। अङ्गानां न केवलं वेदस्य अध्ययने फलमपि तु नित्य लौकिकशास्त्राणाम् अध्ययने नित्यव्यवहारे च आचरणाय तेषां व्यापारः भवति। अतः सर्वैः ज्ञानपिपासुभिः षडङ्गानामध्यनं कर्तव्यमेव। अस्मिन् प्रबन्धे तान्येवाङ्गानि एव सविस्तारं पर्यालोचितानि।

-----

**कूटशब्दाः-**

वेदः, शिक्षा, कल्पः, व्याकरणम्, निरूक्तम्, छन्दः, ज्योतिषम्, कालः

------

**उपोद्घातः -**

अङ्ग्यते विषयो बुद्ध्यते अमीभिः इति अङ्गम्, वेदस्याङ्गानिवेदाङ्गानिइतिव्युत्पत्यावेदाङ्गशब्दःनिष्पद्यते।वेदाङ्गानिवेदाभिन्नानि।सम्पूर्णोपिवेदःकेनचित्पुरुषेणउपमीयते।तस्यअङ्गसंघातयुतपुरुषस्यसन्तिनैकानिअङ्गानि,एवमेवषडभिरङ्गैरुपेतःअयंवेदपुरुषः।यथाअङ्गानिविविधकार्यैःपुरुषमुपकुर्वन्तिएवम्वेदाङ्गानिवेदार्थावगमनादौसहयकानिभवन्ति।वेदस्ययथामाहात्म्यंतथावेदाङ्गानामपि।तानिचषड्वेदाङ्गानिशिक्षा-कल्प-व्याकरण-निरुक्त-छन्द-ज्योतिषश्चेति। तथाचनिगदितंमुण्डकोपनिषदि- “द्वेविद्येवेदितव्येपराचैवापराच,तत्रापराऋग्यजुसामाथर्ववेदः,शिक्षा-कल्प-व्याकरणं-निरुक्त-


©Indira Gandhi National Open University

छन्दःज्योतिषामिति”।एतेषाञ्चमाहात्म्यविषयेउक्तंश्रुतौ-
“ब्राह्मणेननिष्कारणोधर्मःषडङ्गवेदःअध्येयःज्ञेयश्च।”
एतानिचषडङ्गानिवेदपुरुषस्यहस्तादिभिःउपमीयते।तदूक्तंशिक्षायां-

“छन्दःपादौतुवेदस्यहस्तौकल्पोथपठ्यते।

ज्योतिषामयनंचक्षुर्निरुक्तंश्रोत्रमुच्यते।।

शिक्षाघ्राणंतुवेदस्यमुखंव्याकरणंस्मृतं।

तस्मात्साङ्गमधित्यैवब्रह्मलोकेमहीयते।।”[i]

सम्प्रतिषण्णांस्वरूपमेकैकशःआलोच्यते—

**शिक्षा -**

शब्दमयमन्त्राणांयथार्थोच्चारणायप्रवर्तमानंवेदाङ्गंशिक्षेत्यभिधीयते।तदुक्तं-
“स्वरवर्णाद्युच्चारणप्रकारःशिक्षतेउपदिश्यतेवायत्रसाशिक्षा।”[ii]शिक्षाग्रन्थानामनुशीलनेन वयं प्राचीनभारतस्य ध्वनितत्वानुशीलनपरम्परां सञ्जानीमः। शिक्षाग्रन्थेभ्यो ध्वनिसम्बद्धाः उच्चारणपद्धतयः, वाक्यन्त्रानि आस्यप्रयत्नाश्च अवबुध्यन्ते। शिक्षापदस्य प्रथमः प्रयोगः तैत्तरीयारण्यके प्राप्तः। तत्र शिक्षायाः अपि वर्णः , स्वरः, मात्रा, बलम्, साम, सन्तानः च[iii] षडङ्गानि उक्तानि। षड्सु अङ्गेषु आदितः त्रीणि अङ्गानि स्वस्याभिधानानुकूलमेव भावमभिव्यनक्ति, परन्तु अवशिष्टत्रयाणाम् आशयः ज्ञातव्यः। बलं नाम स्थानप्रयत्नाभ्यां स्वराणां बलम्। साम नाम माधुर्यादिगुणोपेतैः निर्दुष्टं स्पष्टोच्चारणम्। सन्तानपदस्याशयः पदानां अतिशयसन्निधिः। सत्यपि पदानां स्वतन्तास्तित्वे यदा कदा पदद्वयस्यावश्यकतानुसारेण शीघ्रमेकस्यानन्तरमेकस्योच्चारणं भवति, तदेवोच्चारणं संहितापदेन व्यपदिश्यते। पदेषु आदौ संहिता भवति तत्पश्चादेव सन्धिर्भवितुमर्हति। यथा –‘वायो आयाहि’ अत्र स्वतन्ते द्वे बैदिकपदे स्तः। यदैकस्मिन्नेव वाक्ये वाक्यद्वयस्य सहैवोच्चारणं भवति तदा सन्धिकारेणात्र किमपि परिवर्तनं भवति। तदा पूर्वोदाहरणस्य रूपं ‘वायवायाहि’ भविष्यति। अनेनैव प्रकारेण इन्द्रागो आगतम् अत्र प्रकृतभावो भविष्यति। अर्थात् वर्णानां किमुच्चाणणस्थानं, के प्रयत्नाः, वर्णाः कतिधा, तेषां वर्गीकरणं कथमित्यादयः विषयाः शिक्षायां पर्यालोच्यन्ते। शिक्षाध्ययनं नाम वस्तुतस्तु आधुनिध्वनिविज्ञानस्याध्ययनम्। शुद्धोच्चारणाय पाणिनीयशिक्षायां भणितम् –

‘व्याघ्री यथा हरेद्वत्सं दंष्ट्राभ्यां न च पीडयेत्।

भीता पतनभेदाभ्यां तद्वद्वर्णान्प्रयोजयेत्।।’

प्रत्येकं वेदे वर्णानां उच्चारणशैली समाना भवितुं नार्हति। प्रत्येकं वेदस्य उच्चारणपार्थक्यमस्त्येव। उदाहरणं यथा – मूर्धन्यः षः इत्येतस्य शुक्लयजुर्वेदे रेफन उष्मवर्णैश्च सह संयुक्ते ख-सदृसमुच्चारणं भवति। परन्तु अन्येषु वेदेषु तस्य ष-इत्येव उच्चारणम्। यथा पुरुषसूक्तस्य – 'सहस्रशीर्षा पुरुषः' – अत्र रेफस्य अनन्तरं षः अस्ति अतः अस्य माध्यन्दिनशाखीयोच्चारणे ख-इत्युच्चारणेन 'सहस्रशीरेखा पुरुखः' एवमुच्चारणं भवति। परन्तु अस्यैव मन्त्रस्य ऋग्वेदीयोच्चारणे षः इत्येवोच्चारणं भविष्यति।

यद्यपि बहूनां शिक्षाग्रन्थानां नाम श्रुयते परन्तु सम्प्रति एकः एव शिक्षाग्रन्थः सर्वजनलब्धः स च पाणिनीयशिक्षाग्रन्थः। वेदपाठावसरेशुद्धमुच्चारणंस्वरक्रिया, यथोचितं स्वरसमन्वयः, हस्तादीनां अङ्गानां यथार्थं सन्निवेशः प्रभृतयः काम्यन्ते।अशुद्धोच्चारणंभ्रष्टस्वरश्चमहत्दुष्फलंजनयति।तदुक्तं-

"मन्त्रोहीनःस्वरतोवर्णतोवामिथ्याप्रयुक्तःनतमर्थमाह।

सवाग्वज्रोयजमानंहिनस्तियथेन्द्रःशत्रुःस्वरतोपराधात्।।"[iv]

अतः भगवान् पतञ्जलिरपि वदति –'एकः शब्दः सम्यक् ज्ञातः सुप्रयुक्तश्च स्वर्गे लोके च कामधुक् भवति' [v]।तत्र प्रसिद्धायां पाणिनीयशिक्षायां यथार्थमुच्चारणक्रियायाः, सन्धेः, संहितापाठस्य प्रभृतीनां सुव्याख्या प्राप्यते। अस्मिन् ग्रन्थे व्यासनारदशौनकादयः अपि प्रोक्ताः।

अस्माभिः श्रुतेषु शिक्षाग्रन्थेषु केशवमाध्यन्दिनीयलोमशामोघनन्दिन्यः शुक्लयजुर्वेदसम्बद्धाः । एतेषु अमोघनन्दिनी उच्चारणविध्युपेता सप्तपञ्चाशच्छ्लोकविशिष्टा संरचना। माध्यन्दिनशिक्षाग्रन्थे सप्तिविंशतिः श्लोकाः वर्तन्ते। केशवे तु केवलं नव श्लोकाः वर्तन्ते। लोमशीशिक्षायां तु चत्वारः खण्डाः चत्वारिंशत् श्लोकाश्च वर्तन्ते।

भारद्वाजचारायणीयारण्यव्यासशिक्षाः तैत्तरीयसंहितासम्बद्धाः। तैत्तरीयसंहितायाः शिक्षाग्रन्थेषु प्राचीना शिक्षा व्यासशिक्षा क्षुद्रा च आरण्यशिक्षा वृहच्च चारायणीयशिक्षा।

अथर्ववेदस्य शिक्षा माण्डुकी। अस्यां षोडश अध्यायाः चतुरशीत्यधीकैशतं श्लोकाश्च विलसन्ति। वशिष्टशिक्षायां तु केवलं अक्षराणां द्वित्वाऽवृत्ती आलोचिते। गद्यशैल्या रचितायां आपिशलीशिक्षायां वर्णमालास्थितानां अक्षराणां विभागाः तेषां उच्चारणविधयश्च सम्प्रोक्ताः।

सामवेदसंश्लिष्टा शिक्षा नारदीयशिक्षा। अस्यां द्वौ प्रपाठकौ प्रतिप्रपाठकं अष्टौ अध्यायाश्च विराजन्ते। चत्वारिंशदधिकद्विशतं श्लोकाः केचन गद्यांशाश्च अत्र विद्यन्ते। सामगानाय स्वरादिनियमाः अत्र विशेषेण पर्यालोचिताः।

**कल्पः -**


©Indira Gandhi National Open University

कल्पशब्दस्यव्युत्पत्तिलभ्योअर्थोभवतिकल्प्यतेसमर्थ्यतेयागप्रयोगःअत्रइतिकल्पः।वेदभाष्यकारस्य विष्णुमित्रस्यमतानुसारं- "कल्पंनामवेदविहितानांकर्मणामानुपूर्व्येणकल्पनाशास्त्रम्।" अर्थात्यज्ञस्यप्रयोगविधिःयस्मिन्शास्त्रेआलोच्यतेतत्कल्पशास्त्रमित्युच्यते।

नियमो विधिः न्यायः आदेशादयः अर्थाः कल्पस्य भवन्ति। सूत्रस्य समान्यार्थो भवति संक्षेपः। आशयस्तावत् यस्मिन् विधिन्यायरीतिकर्मानुष्टानादीनि संक्षेपेन निर्दुष्टं निर्दिष्टानि तदेव कल्पसूत्रम्। प्राचीनग्रन्थानामनुशीललेन वयं जानीमः पूर्वं कल्पसूत्राणां संख्या आसीत् त्रिंशदधिकैशतम्, परन्तु सम्प्रति केवलं चत्वारिंशत् उपलभ्यन्ते। एतेषु चत्वारिंशत्कल्पसूत्रेषु आहत्य द्वाचत्वारिंशत्कर्माणि विहितानि। चतुर्दश श्रौतयज्ञाः, सप्तगृहयज्ञाः, पञ्चमहायज्ञाः, षोडश मानवसंस्काश्च।

कालान्तरेण श्रौतसूत्रस्मार्तसूत्राभ्यां कल्पसूत्रं द्विधा विभक्तम्। श्रौतं नाम श्रुतौ भवम् अर्थात् वेदे विद्यमानेन यज्ञेन सम्बद्धम्। स्मार्तः नाम स्मृतौ भवः अर्थात् गार्हपत्यसम्बद्धः स्मरणसम्बद्धो वा। कालान्तरे श्रौतसूत्रमपि द्विधा विभक्तम् – श्रौतसूत्रं शुल्वसूत्रं च। स्मार्तसूत्रमपि द्विधा विभक्तम् – गृह्यसूत्रं धर्मसूत्रं च।

ब्राह्मणग्रन्थेषु वर्णितैः त्रिभिः श्रौताग्निभिः (दाक्षिणाग्निः, आहवनीयाग्निः, गार्हपत्याग्निः) सम्पाद्यमानानां अग्निहोत्र-दर्शपौर्णमास-पशुयाग-ऋतुयागादीनां विशिष्टानां चतुर्दशमन्त्राणां वर्णनं यत्र प्राप्यते तत् श्रौतसूत्रम्। ब्राह्मणवदत्रापि कर्मकाण्डसम्बद्धानि विधानानि वर्णितानि। परन्तु ब्राह्मणात् अस्य बहुत्र भेदोऽपि दरीदृश्यते। मुख्येन अत्र वैदिक हविसोमयागसम्बद्धानां धर्मानुष्ठानानां वर्णनं प्राप्यते। सम्प्रति एकादशानां ऋषिप्रवराणां श्रौतसूत्राणि प्राप्यन्ते। ते च यथाक्रमम् – आश्वलायनः, शांखायनः, बौधायनः, आपस्तम्बः, मानवः, कात्यायनः, हिरण्यकेशी, लाटायनः, द्राह्यायणः, जैमिनी, वैतानश्च।

गृहस्थाश्रमसम्बद्धानां धार्मिकक्रियाकलापानां नाना विधीनां च नियामको ग्रन्थ एव गृह्यसूत्रम्। अस्मिन् गर्भाधानात् अन्तेष्टिं यावत् षोडश संस्काराः वर्णिताः। इतोऽपि अत्र पितृयज्ञ-पार्वणयज्ञ-आष्टकायज्ञ-श्रावणीयज्ञ-अश्वायुजीयज्ञ-आग्रहायणीयज्ञ-चैत्रीयज्ञाः सप्त गृह्ययागाः, देवयज्ञ-भूतयज्ञ-पितृयज्ञ-ऋषियज्ञ-नृयज्ञाः पञ्च महायागाः निर्दिष्टाः। संक्षेपेण वक्तुं शक्यते अत्र गृहाग्नौ सम्पाद्यमानाः यागाः संस्काराः तथा समाजे प्रचलिताः प्रथाः निर्दिष्टाः। त्रयोदश प्रधानगृह्यसूत्राणि प्राप्यन्ते – आश्वलायनः, शांखायनः, बौधायनः, मानवः, आपस्तम्बः, हिरण्यकेशी, भारद्वाजः, पारस्करः, द्राह्यायण, गोभिलः, खादिरः, कौशिकः, शौनकश्च।

रीतिनीतिधर्मादिसंकेतैः सह यस्मिन् सूत्रे चतुर्णामाश्रमाणां कर्तव्याकर्तव्यविचाराः प्रतिपादिताः तस्य धर्मसूत्रमित्याख्या। वस्तुतस्तु धर्मसूत्रं गृह्यसूत्रस्यैव विभागान्तरं, अस्मिन् धार्मिककृत्यानां वर्णनं आधुनिकनियमानां च प्रतिपादनं कृतम्। अतः पाश्चात्यो विद्वान् विण्टरनित्समहाभागः उवाच –"Books Of Instructon on Sprititual and Secular law the Oldest law


©Indira Gandhi National Open University

books of the Indians.” परन्तु सम्प्रति केषाञ्चन गृह्यसूत्रं तु प्राप्यते परन्तु धर्मसूत्रं न प्राप्यते। यथा आश्वलायन-शांखायन-मानवानां धर्मसूत्रं न प्राप्यते परन्तु एतेषां श्रौतसूत्रं गृह्यसूत्रं च प्राप्येते। परन्तु बोधायन-आपस्तम्ब-हिरण्यकेश्यादीनां पूर्णं धर्मसूत्रं लभ्यते। प्राप्तेषु धर्मसूत्रेषु गौतमधर्मसूत्रं विशिष्टतां भजते।

शुल्वसूत्रेषु यज्ञवेद्याः निर्माणायतत्परिमापकाः विधयः प्रोक्ताः। शूल्वं नाम यज्ञवेद्याः परिमापाय रज्जुः। आधुनिकज्यामितिशास्त्रस्य रेखागणितस्य वा प्राचीनं स्वरूपं शुल्वसूत्रम्। अज्ञाः एव पिथागोरास् महोदायान् ज्यामितिशास्त्रस्य जनकत्वेन स्वीकुर्वन्ति। आपस्तम्बः, बौधायनः, मानवः प्रभृतयः प्रसिद्धानि शुल्वसूत्राणि।

**व्याकरणम् -**

सकलशास्त्रशिरोभूतस्य वेदपुरुषस्य मुखत्वेन स्मृतस्य व्याकरणशास्त्रस्योद्भवः कदा अभूदिति निश्चयेन वक्तुन्न शक्यते। परन्तु अनुमातुं शक्यते यदुपलब्धवैदिकपदपाठानां रचनाकालात् प्रागेव संस्कृतव्याकरणं सुसमृद्धमासीत्। इदन्न कस्यचित् अज्ञानगोचरं यदिह संसारे प्रवृत्तानां सर्वासामपि विद्यानां मूलं परमेश्वरोपदिष्टो वेद एव। व्याकरणशास्त्रस्यापि मूलं वेद एव। वैदिकमन्त्रेषु बहूनां मन्त्राणां व्युत्पत्तिः प्राप्यते। यथा यज्ञेन यज्ञमयजन्त देवाः[vi]।

यो सहांसि सहसा सहन्ते[vii]।

स्तोस्तृभ्यो मंहते मघम्[viii]। प्रभृतयः।

वाल्मिकीरामायणे रामवचसि हनुमतो व्याकरणज्ञानस्य प्रशंसया वयं ज्ञातुं शक्नुमो यत् त्रेतायुगेऽपि व्याकरणशास्त्रं सुसमृद्धमासीत्। तदुक्तम् –

“नूनं व्याकरणं कृत्स्नमनेन बहुधा श्रुतम्।

बहु व्याहरताऽनेन न किञ्चिदपभाषितम्[ix]॥”

भारतीयपरम्परायां जगति विद्यमानानां सर्वासां विद्यानां सर्वेषां शास्त्राणाञ्च आदिस्रष्टा ब्रह्मेति सर्वैः स्वीक्रियते। अतो विद्वद्भिर्व्याकरणशास्त्रस्याप्यादिः स्रष्टा ब्रह्मा इति स्वीक्रियते। ब्रह्मणोऽनन्तरं व्याकरणकर्ता देवगुरुर्वृहस्पतिरिति स्वीक्रियते। स एव अर्थशास्त्रस्यागदतन्त्रस्य च कर्ताऽसीत्। परन्तु एतावता तस्य व्याकरणविषये एकाऽपि रचना न प्राप्यते। वृहस्पतिरिन्द्राय स्वीयं व्याकरणज्ञानं प्रददौ। अयं विशेषः देवराजस्य विषये यत्तैः प्रकृतिप्रत्ययविभागेन संस्कृतस्य व्याकरणगर्भं प्रतिसंस्कृतम्। ऋग्तन्त्रकारेण यथोक्तम् – “ब्रह्मा बृहस्पतये प्रोवाच, बृहस्पतिरिन्द्राय, इन्द्रो भारद्वाजाय, भारद्वाज ऋषिभ्यः, ऋषयो ब्राह्मणेभ्यः।” महामुनिर्यास्कः पतञ्जलिश्च बहुत्र वेदस्य एतादृशान् मन्त्रान् स्मरतः यत्र संस्कृतस्य स्वरूपं सूचितमस्ति। यथा-


©Indira Gandhi National Open University

“चत्वारि शृङ्गा त्रयोऽस्य पादा द्वे शीर्षे सप्त हस्तासोऽस्य।

त्रिधा बद्धो वृषभो रोरवीति महा देवो मर्त्याम् आविवेश[x]॥”

अस्याशयो भगवता फणिराजेन इत्थं व्याचख्ये – चत्वारि शृङ्गेति नाम-आख्यात-उपसर्ग-निपाताः, त्रयः पादाः इति त्रयः कालाः भूत-भविष्य-वर्तमानाः, त्रीणि वचनानि, त्रयः पुरुषाश्च। द्वे शीर्षे सुब्तिङन्तरूपे, सप्तहस्ता इति सप्तविभक्तयः, त्रिधा बद्ध इति कृदन्ततद्धितान्तरूपेण समासान्तत्वेन नियमितो रोरवीति सर्वानतिशेते, महान् देव इति दैवी वाक्, मर्त्यान् आविवेशेति। यजुर्वेदेऽपि उक्तम् – “दृष्ट्वा रुपे व्याकरोत् सत्यानृते प्रजाप” इति।

न केवलं संहिताशास्त्रेषु ब्राह्मणसाहित्येऽपि व्याकरणस्यास्तित्वविषये बहुधा प्रपञ्चितम्। अपि च “पुराकाले एतदासीत् संस्कारोत्तरकालं ब्राह्मणा व्याकरणं स्माधीयते”- इति पतञ्जलिस्मरणेन ज्ञायते यत् संहिताकालेऽपि व्याकरणं सुव्यवस्थितमासीत्। गोपथब्राह्मणेऽपि आम्नातम् –

ओंकारं पृच्छामः, को धातुः, किं प्रातिपदिकं, किं नामाख्यातं, किं लिङ्गं, किं वचनं, का विभक्तिः, कः प्रत्ययः, कः स्वरः, उपसर्गो निपातः, किं वै व्याकरणं , को विकारः, को विकारी, कतिमात्रः, कतिवर्णः, कत्यक्षरः, कतिपदः, कः संयोगः, किं स्थाननादानुप्रदानानुकरणम् इति[xi]।

अर्थात् अत्रेदं स्पष्टं यत् प्रतिपदपाठादेव भाषाज्ञानस्यासम्भवाद् प्रकृतिप्रत्ययविभागेन साम्यान्यीकरणं यदैवानुभुतं तदैव व्याकरणस्य प्रादुर्भावः। एषा च प्रवृत्तिः संहितासमकालैव । तेन व्याकरणस्य मूलसंहिताकालादारभ्य पतञ्जलिपर्यन्तमेव प्रवर्तनकालः सञ्चरति। तदनन्तरं व्याख्यानकाल आविर्बभूव। सम्प्रति स प्रक्रियारूपेण पुरतः सञ्चरति।

व्याक्रियन्तेव्युत्पाद्यन्तेशब्दाःअनेनेतिव्याकरणम्।वेदाङ्गानांरक्षकत्वात्वेदार्थाववोधनेचसहायकत्वादिकारणात्व्याकरणंवेदाङ्गेषुमुख्यतांभजते।अतःउक्तंशिक्षायां- “ मुखंव्याकरणंस्मृतमिति।” भाषाशुद्धयेव्याकरणस्यमहतीअपेक्षाभवति।कृष्णयजुर्वेदे श्रुयते अविकृतान् शब्दान् इन्द्रः व्याकरोत्, तदुक्तम् – वाग्वै पराच्यव्याकृता आसीत्, ते देवा इन्द्रमनुव्रुवन्निमां नो वाचं व्याकुरु इति[xii]। अर्थात् पूर्वम् इयं वाक् अखण्डः अव्याकृतश्च आस्ताम्, देवताः इन्द्रं न्यवेदयन् इमामखण्डं वाक् व्याकुरु इति। ततः इन्द्रः इमां अविकृतां वाक् व्याकार्षीत् तस्मात् व्याकरणम्य व्याकृता वाक् इत्याख्या। व्याकरणदार्शनिकः भर्तृहरिः वाक्यपदीये व्याकरणं वाङ्मलानां चिकित्सकत्वेन निर्दिदेश –

‘तद्वारमपवर्गस्य वाङ्मलानां चिकित्सितम्।

सर्वविद्यापवित्रोऽयमधिविद्या प्रकाशते।।’


©Indira Gandhi National Open University

नहिअवैयाकरणःकश्चित्साधून्शब्दान्प्रयोक्तुमीशः।तथाभगवान्पतञ्जलिःव्याकरणमहाभष्येव्याकरणाध्ययनस्यपञ्चमुख्यप्रयोजनानियथा- "रक्षोहागमलघ्वसन्देहाःप्रयोजनमिति" तथाचतेअसुराः, दुष्टःशब्दःइत्येवंत्रयोदशगौणप्रयोजनानिउवाच।बहुषुव्याकरणग्रन्थेषुसत्स्वपिपाणिनीयव्याकरणमेवसर्वैःमर्यादार्हत्वेनस्विक्रीयते। पाणिनेः दर्शनपद्धत्यादयः अतुलनीयाः विज्ञानसम्मताश्च। पाणिनेः अष्टाध्याय्याः पर्यालोचनेन वक्तुं शक्यते पाणिनिना केचन विचाराः तत्पूर्ववर्तिभ्यः आचार्येभ्यः स्वीकृताः परन्तु व्याकरणस्य पारिभाषिकशब्दाः वर्णसम्बद्धाः विशिष्टविचाराः शिवसूत्रगणसूत्रादयः विचाराः तेन स्वेन उद्भाविताः। पाणिनिः स्पष्टतायाः संक्षिप्तवचसः द्व्यर्थहीनस्य च पक्षधरः आसीत्।

**निरुक्तम् –**

निघण्ट्वाख्यस्यवैदिककोशस्यभाष्यरूपमस्तिनिरुक्तम्।निरुक्तस्यकर्ताभवतियास्कः।कठिनवैदिकशब्दानांव्युत्पत्तिबोधकंशास्त्रन्निरुक्तम्। यास्कप्रणीतस्य निरुक्तस्योपरि आचार्येण दुर्गाचार्येण वृत्तिर्विरचिता। यास्कः निरुक्ते आष्टादश निरुक्तकारान् सस्मार। परन्तु तत्र वृत्तिकारः चतुर्दश एव अस्मारीत्। यास्के स्मृता निरुक्तकाराः यथा- आग्राहयणः, औदुम्बरायणः, और्णनाभः, कास्थक्यः, क्रोष्टुभिः, गार्ग्यः, गालवः, चर्मशिरा, तैटिकिः, शतवलाक्षः, शाकपूर्णिः, स्थौलाष्ठीविः,औपमन्यवः, शाकटायनः, शाकल्यः, कौत्सः, और्णवामः, वार्ष्यायणिश्च। एतेषु कौत्सः यास्कसमकालिकः बभूव इति विद्वांसः अभिमन्यन्ते।महर्षिणा कश्यपेन विरच्यमानः निघण्टुः निघण्टुनैगमदैवतैः त्रिभिः काण्डैः विभक्तः अभूत्। निघण्टुकाण्डे वैदिकशब्दान् यथाक्रमं समग्रहीत्। ततः नैगमकाण्डे तथैव वैदिशब्दाः व्याख्याताः परन्तु तेषां व्युत्पत्तिः नैव प्रोक्ताः। अनन्तरं दैवतकाण्डे पृथ्वीस्वर्गान्तरीक्षादिभेदैः देवाः वर्गीकृताः विविक्ताश्च। पञ्चसु अध्यायेषु रचितस्य निघण्टोः द्वादशभिरध्यायैः यास्कः निरुक्तं व्यररचत्। तत्रसर्वमान्यंमतमिदंयत्प्रत्येकंशब्दस्यकेनापिधातुनासहसम्बद्धोवर्तते।तथाचसर्वेशब्दाःव्युत्पन्नाः। अतः तैः अग्निः इन्द्रः वरुणादयः देवाः अर्थपूर्वकं विवेचिताः। ऋग्वेदभाष्यभूमिकायां निरुक्तस्य संज्ञा भणिता- "अर्थावबोधेनिरपेक्षतयापदजातंयत्रोक्तंतन्निरुक्तम्।" तच्चवर्णागमादिभेदेनपञ्चधा, तदुक्तम्-

"वर्णागमोवर्णविपर्ययश्चद्वौचापरौवर्णविकारनाशौ।

धातोस्तदर्थातिशयेनयोगस्तदुच्यतेपञ्चविधंनिरुक्तम्।।"

निघण्टोः व्याख्यातृषु देवराजयज्वास्कन्दस्वामीप्रभृतयः नैके विद्वांसः अभुवन् परन्तु तेषु यास्कः प्रमुखतां भजते। तथैव यास्कस्य निरुक्तोपरि नैके विद्वांसः टीकाः व्यलिखन् ।

**छन्दः -**


©Indira Gandhi National Open University

छदिआच्छादनेधातोः‘छन्दः’ पदंनिष्पन्नम्।छादयतिआवृणोतिमन्त्रप्रतिपाद्ययज्ञादीन्इतिछन्दः। अतः भगवान् छन्दःपदस्य निर्वचनं कुर्वन्नवोचत् –‘मन्त्रो मननात्, छन्दांसि छादनात्, स्तोत्र स्तवनात्, यजुः यजते’ अर्थात् मन्त्राणामर्थो भवति मननम्, छन्दसः विषयो भवति छादनम्, स्त्रोत्रस्य कर्म स्तुतिः यजुषश्च यजनम्। कात्यायनोऽपि छन्दसः निर्वचनं कुर्वन्नाह - ‘यदक्षरपरिमाणं तच्छन्दः’[xiii]।वेदाःसन्तिछन्दोबद्धाःअतःतेषाम्उच्चारणायअपेक्ष्यतेछन्दोज्ञानम्। वस्तुतस्तु छन्दः आसुरीशक्तिभ्यः वेदं तदीयान् क्रियाकलापांश्च रक्षति। अतः एव उक्तम् - ‘दक्षिणतोऽसुरान् रक्षांसि त्वष्ट्रान्यपहन्ति त्रिष्टुब्जिर्वज्रतो वै विष्टुप्। अर्थात् यज्ञकाण्डस्य दक्षिणपरिधिः त्रिष्टुप्स्वरूपः, विष्टुब्वज्रसदृशः यः विघ्नोत्पादकान् असुरान् विनश्यति। परन्तु कालान्तरेण छन्दः वेदार्थकमभूत्, यथा भगवान् पाणिनिः सूत्रं चकार - ‘बहुलं छन्दसि’’[xiv]छन्दसोपेतवेदमन्त्राणां यथार्थमुच्चारणाय छन्दश्शास्त्रस्य प्रयोजनम्। पूर्वं तु छन्दसः पृथग्ग्रन्थः न भवति स्म परन्तु प्रातिशाख्यस्य केषुचित् अध्यायेषु एव छन्दांसि पर्यालोच्यन्त। परन्तु प्रातिशाख्यस्य व्याकरणमुख्यप्रतिपादकत्वात् पृथक् शास्त्ररचनायाः आवश्यकता बभूव। वेदे नैकानि छन्दांसि प्राप्यन्ते परन्तु वेदेषु सप्तदश मुख्यानि छन्दांसि सन्ति। तानि यथा – गायत्री, उष्णिक्, अनुष्टुप्, बृहती, पङ्क्तिः, त्रिष्टुप्, जगती, अतिजगती, शक्वरी, अतिशक्वरी, कृतिः, प्रकृतिः, आकृतिः, विकृतिः, संस्कृतिः, अभिकृतिः, उत्कृतिश्च। एतेषां प्रत्येकं छन्दसां उच्चारणविधिः भिद्यते। ऋते यथार्थोच्चारणेन अभीष्टप्राप्तिर्न भवति। अस्यवेदाङ्गस्य वहुषु ग्रन्थेषु सत्स्वपिप्रतिनिधिग्रन्थोविद्यतेभगवतः पाणिनेः अनुजेन वर्षोपाध्यायशिष्येण पिङ्गलाचार्येण कृतम् “ छन्दःसूत्रम्।” श्रूयते देवाधिपतिः शिवः अस्यः छन्दसः कर्ता। सःवृहस्पतये उवाच वृहस्पतिश्च इन्द्राय इन्द्रः माण्डव्याय शुश्राव ततः ऋषिक्रमेण पिङ्गलं प्रति आजगाम। पिङ्गलात्पूर्वमपि छन्दःशास्त्राणि आसन् तस्य परिचयं तु स्वयं पिङ्गलाचार्यः प्रादात्। तैः तस्य ग्रन्थे सप्त छन्दसः आचार्याः स्मृताः , यथा – क्रौष्टुकिः, यास्कः, ताण्डी, सैतवः, काश्यपः, रातः, माण्डव्यश्च। बहुभिःशब्दःअपिछन्दोरूपेणस्वीक्रियते,नाट्यशास्त्रेभरतमुनिना भणितम् - “ छन्दोहीनोनशब्दोस्ति, नशब्दःछन्दोवर्जितम्।”

**ज्योतिषम् -**

अन्तिमंतावत्ज्योतिषमिति।वस्तुतस्तु ज्योतिषमेकं विज्ञानम्, दर्शनं च। पृथिव्यां भावपदार्थानामभिव्यक्तिः क्रियारूपेण सत्त्वरूपेण च व्यष्ट्या भवति,तदेव समष्ट्या नक्षत्रेषु विद्यते। सर्वाः आकृतयः क्रियाः शब्दादयश्य नित्याः सन्ति केवलं तेषां आविर्भावतिरभावौ भवतः। प्राणिनां कर्म संकल्पपूर्वकं भवति अर्थात् संकल्पो एव कर्मणः कारणम्। संकल्पस्तु भावानामेव अभिव्यक्तिः। इमे भावाः एव ग्रहसंञ्चालकाः। अतः ग्रहानुसारं कर्म भवतीति वक्तुं शक्नुमः। प्रारब्धवादेन सह ज्योतिषः न कोऽपि भेदः। नृणां कर्म स्वयमेव तस्य फलं ददाति।[xv]


©Indira Gandhi National Open University

मानवानां कल्याणभावना वेदेषु कृता, परन्तु तेषां रक्षा विना ज्योतिषं न सम्भवति। अतः उक्तम् - -

‘वेदाहियज्ञार्थमभिप्रवृत्ताः

कालानुपूर्वाविहिताश्चयज्ञाः।

तस्मादिदंकालविधानशास्त्रम्

योज्यतिषंवेदसवेदजज्ञान।।’[xvi]

इतोऽपि ग्रहणादीनां अध्ययनं, अणुवादिविचाराः, पृथिव्याः परिभ्रमणगत्यादिविज्ञानसम्बद्धविचाराः अपि ज्योतिषादेव प्रारब्धाः। अतः ज्योतषम् वेदाङ्गेषु मूर्धन्यमस्ति –

‘यथा शिखा मयूराणां नागानां मणयो यथा।

तद्वद्वेदाङ्गानां गणितं मूर्ध्नि संस्थितम्।।

पुरा नृणां कालदिगादिसम्बन्धिनः जिज्ञासायाः एव ज्योतिषः जन्म। शनैः शनैः ते दिवारात्रिपक्षमासवर्षमासादिविषये अपि ज्ञातारः अभवन्। ‘गणकतरङ्गिण्यां’ ज्योतिर्विद्यायाः अष्टादश प्रवर्तकाः स्मृताः – सूर्यः पितामहः, व्यासः, वसिष्ठः, अत्रिः, पराशरः, कश्यपः, नारदः, गर्गः, मरीचिः, मनुः अङ्गिरा, लोमशः, च्यवनः, यवनः, भृगुः, शौनकश्च। एवमेतेभ्यः शिष्यपरम्पराक्रमेण ज्योतिषः विस्फारणं जातम्। वेदाङ्गत्वेन प्राप्तस्य ज्योतिषाङ्गस्य सम्प्रति ग्रन्थद्वयं समुपलभ्यते। तौ ग्रन्थौ यथा ऋग्वेदसम्बद्धं ‘आर्यज्योतिषम्’ यजुर्वेदसम्बद्धं ‘याजुष्ज्योतिषम्’ च। आर्यज्योतिषे उक्तम् - ‘प्रणम्य शिरसा कालमभिवाद्य सरस्वतीम्। कालज्ञानं प्रवक्ष्यामि लगधस्य महात्मनः।’

महात्मनः लगधाचार्यस्य ‘वेदाङ्गज्योतिषम्’ एकः लघुपद्यात्मकः ग्रन्थो विद्यते, अस्मिन् सप्तविंशतिनक्षत्रसम्बद्धाः नियमाः प्रोक्ताः।

‘अथर्वज्योतिषाख्यः’ अपि ग्रन्थः फलादेशदृष्ट्या महान्विद्यते। अस्मिन् ग्रन्थे द्वाषष्ट्युत्तरैकशतं श्लोका विद्यन्ते। महर्षिर्नारदो यदा ब्रह्मज्ञानार्जनाय सनत्कुमारं जगाम, नारदेन के विषया अधीताः इति सनत्कुमारेण पृष्टे सति नारदस्तस्य नक्षत्रराश्यादिज्योतिर्विद्यायाः अङ्गीकारं चकार इति छान्दग्योपनिषदि प्राप्यते।[xvii] अनेन ज्योतिषस्य शास्त्रीयपरम्परा वयं ज्ञातुं शक्नुमः।


©Indira Gandhi National Open University

विमानावायुवार्यादयः विद्याः कदाचित् ज्योतिषे अन्तर्भवन्ति स्म। विमानविद्यायाः प्रथमो ग्रन्थो भवति ऋषिणा पराशरेण कृतम् 'पराशरकल्पः' तदनन्तरं महर्षिः भरद्वाजः 'यन्त्रसर्वस्वं' व्यलिखत् यस्य कालान्तरेण 'विमानशास्त्रनाम्ना' प्रकाशनमभवत्। ज्योतिषशास्त्रस्य पुरा गणितत्वेन स्वीकारः अभवत् परन्तु समयान्तरेण तस्य 'स्कन्धत्रयाख्यया' सिद्धान्तसंहिताहोराभिः विभाजनम् अभवत्। सम्प्रति अस्य होरागणितसंहिताप्रश्ननिमित्ताख्यैः पञ्च रूपाणि प्राप्यन्ते। सम्प्रति तु ज्योतिषः क्षेत्रमितोऽपि वितत्य जीवविज्ञानपदार्थविज्ञानरसायनचिकित्साप्रभृतिषु विस्फारिताः। ज्योतिषस्य विषयाः अस्माकं नित्यजीवनेन सह सदा सम्बद्धाः। भूशोधन-दिक्शोधन-शल्योद्धार-गेहारम्भ-गृहप्रवेश-मुहूर्त्तगणना-उल्कापात-अतिवृष्टिप्रभृतयः तथा च प्रश्नाक्षर-प्रश्नलग्न-स्वरज्ञानविधि-कालगणना-ग्रहाणां गतिनिरूपण-जातकविचारादयः विषयाः ज्योतिषेणैव गण्याः। तिथिः वारः नक्षत्रम् योगः करणं च पञ्चाङ्गं मिलित्वा शुभसमस्य निश्चयं करोति। एतेषां पञ्चानां मेलनेन नैकानि शुभकर्माणि सिद्ध्यन्ति। इतोऽपि नित्यजीवने प्रतिपदं प्रयुक्तस्य अङ्कशास्त्रस्यापि मूलं ज्योतिषमेव। अतः वक्तुं शक्यते ऋते ज्योतिषं मानवजीवनम् विकलम्।

**वेदाङ्गेषु कालचर्चा -**

वेदाङ्गेषु विशेषतः ज्योतिषे कालचर्चा प्राप्यते। अतः गद्यते ज्योतिषं वेदपुरुषस्य नेत्रमिति। कालस्य गणना एव ज्योतिषस्य मुख्यः विषयः। परन्तु तं विहाय अन्येषु वेदाङ्गेषु अपि कालसम्बद्धाः चर्चाः लभ्यन्ते।

व्याकरणे कालशब्दस्य व्युत्पत्तये कलयति कालयति वा इत्यनयोः द्वयोः तिङन्तयोः प्रयोगः भवति। पाणिनीयानुगुणं कालशब्दः कल्-गतौ इत्स्मात् धातोः निष्पन्नः अतः कालः गतिवाचकः। कल गतौ संख्याने, कल् क्षेपे, कल आस्वादने , कल शब्दसंख्यानयोः एतेभ्यः सर्वेभ्यः अपि धातुभ्यः घञ् प्रत्यये क्रियमाणे कालशब्दो निष्पद्यते। एवं च कालशब्दस्य विग्रहो भवति – कलयति सर्वमिति कालः। अर्थात् यः सर्वान् कलयति अन्यान् कालयति वा सः कालः। सामान्येन वक्तुं शक्नुमः यस्मात् सर्वमुत्पद्यते, यस्मिन् च सर्वं लीयते येन च सर्वेषां गणना भवति स कालः। कलनशब्दस्य नाना अर्थाः भवन्ति – गतिः , विक्षेपः, गणना, भोगः, शब्दः, स्वात्मनि लयश्च। एवं च कालस्य अर्थो भवति गतिः गणना अन्तश्च। एवं च कालपदस्य अर्थद्वयमागच्छति – क्रमः अथवा संख्यावचनम् अथवा विनाशः अन्तो वा। एवं कालः गणनया सृष्ट्या च सम्बद्धः।

व्याकरणे कालस्य त्रीणि रूपाणि प्राप्यन्ते – भूतः, भविष्यत्, वर्तमानश्च तेषाम् अद्यतनाऽनद्यतनादिभेदेन एकदाश भेदाः सम्पादिताः आचार्येण पाणिनिना। अथर्ववेदे कालसम्बद्धः महान् विचारः प्राप्यते। अथर्वसंहितायां नवमकाण्डे त्रिपञ्चाशतं चतुःपञ्चाशतं प सूक्तद्वयं कालसम्बद्धम्। उदाहरणार्थं त्रिपञ्चाशतस्य सूक्तस्य एकं मन्त्रं वयं पश्यामः –

कालो भूतिमसृजत्, काले तपति सूर्यः।

काले ह विश्वा भूतानि, काले चक्षुर्विपश्यति।।

अर्थात् कालः एव अस्याः सृष्टेः स्रष्टा। कालस्य प्रेरणया एव सूर्यः संसारं विभापयति। सर्वे प्राणिनः कालाश्रिता एव। नेत्रमपि कालश्रितं सत् नाना पदार्थान् पश्यति।

वेदाङ्गान्तरे निरुक्तेऽपि कालस्य ईदृशी व्याख्या प्राप्यते। यास्को ब्रुते – कालः कालयतेर्गति इति कर्म्मणः, अर्थात् कालः सर्वेषु पदार्थेषु गतिं जनयति एवं च कलयति नाम संहारमपि जनयति। अयमर्थः व्याकरणानुरूपमेव। इतोऽपि कालवाचकशब्दानां कालघटकशब्दानां च निरक्तिं कृत्वा तस्य स्वरूपं स्पष्टीकृतमाचार्येणयथा दिनमित्यनेन द्वयोः अर्थयोः बोधो जायते अस्माकं एकं तु रात्रेर्भिन्नस्य कालस्य अपरं तु दिवारात्रस् समन्वितस्य बोधो भवति। परन्तु निरुक्ते उभयोः कृते पृथक् निर्वचनं चकार आचार्यो यथा सूर्यप्रकाशवाचकाय दिवेति शब्दाय दयुत् धातुं प्रयुङ्क्त। तथा अहन् शब्दस्य द्विवचनं अहनी इति पदं प्रायुनग् दिवारात्राय। एवमेव अहः इत्यस्यापि प्रयोगः दिवारात्राय भवति। वर्तमानाय अद्य इति प्रयुज्यते। अद्य इत्यनेन प्रातः सूर्योदयमारभ्यः अपरदिवसस्य सूर्योदयप्राक्पर्यन्तं कालः बुध्यते। अद्य इत्यस्य आगामी दिवसः श्वः इत्युच्यते तस्य अर्थं कुर्वन् आचार्यो वदति – श्वः उपाशंसनीयः कालः। अद्य इत्यस्य पूर्वतनीयस्य दिवसस्य ह्यः इत्याख्या। तस्यापि अर्थम् अकार्षीत् आचार्यः यास्कः – ह्यो हीनः कालः।

## उपसंहारः -

उपर्युक्तं सर्वं पर्यालोच्य वक्तु शक्नुमः अङ्गं विना यथा अङ्गिनः अस्तित्वं न भवति। तथैव विना अङ्गानाम् अध्ययनम् अङ्गिनः वेदस्य ज्ञानम् तस्मात् अपूर्वप्राप्तिश्च नैव सेत्स्यति। यथा नित्यव्यवहारे अङ्गानां प्रयोगः तथैव नित्यवेदाभ्यासे अङ्गानां उपयोगः वर्तते। अङ्गानां न केवलं वेदस्य अध्ययने फलमपि तु नित्य लौकिकशास्त्राणाम् अध्ययने नित्यव्यवहारे च आचरणाय तेषां व्यापारः भवति। अतः सर्वैः ज्ञानपिपासुभिः षडङ्गानामध्यनं कर्तव्यमेव। अतः मनुः प्राह –'वेदाङ्गानि च सर्वाणि कृष्णपक्षेषु सम्पठेत्'[xviii]।

---------

[i]पाणिनीयशिक्षा – 41-42

[ii]ऋग्वेदभाष्यभूमिका।

[iii]शिक्षां व्याख्यास्यामः । वर्णः, मात्रा, बलं, साम, सन्तानः इत्युक्तः शिक्षाध्याये – तैत्तरीयोपनिषद् – 1/2

[iv]पाणिनीयशिक्षा।

[v]व्याकरणमहाभाष्यस्य पस्पशाह्निकम्।

[vi]ऋग्वेदसंहिता – १/१६४/५०

[vii]ऋग्वेदसंहिता – ६/६६/९


©Indira Gandhi National Open University

[viii]ऋग्वेदसंहिता – १/११/३

[ix]वाल्मिकीरामायणम्, किष्किन्धाकाण्डम्, सर्गः – 3, श्लोकः - 23

[x]ऋग्वेदसंहिता – ४/५८/३

[xi]गोपथब्राह्मणम् – १/२४

[xii]कृष्णयजुर्वेदः – 6-4-7-3

[xiii]कात्यायनकृतायां ऋग्सर्वाणुक्रमण्याम्।

[xiv]अष्टाध्यायी – 2/4/39, 2/4/73, 2/4/76, 3/2/88, 5/2/122, 6/1/34, 7/1/8, 7/1/10, 7/1/103, 7/3/97, 7/4/78

[xv]कल्याण-हिन्दू,संसंकृति अङ्क – पु. - 288

[xvi]आर्यज्योतिषम्।

[xvii]छान्दग्योपनिषत् – 7/1/2/4

[xviii]मनुस्मृतिः – 4/18

## ग्रन्थसूची


1. प्रो. व्रजविहारी चौबे, वेदविज्ञान-चिन्तन।
2. योगीराज-वसुः, वेदपरिचयः।
3. Bangla Library, https://www.ebanglalibrary.com/
4. डॉ उदय नाथ झा (अशोक), मिथिला में वेद और वेदाङ्ग।
5. Modern Sanskri thttps://modernsanskrit.com/




©Indira Gandhi National Open University